श्री नारायण हृदय स्तोत्रं

श्री नारायण हृदय स्तोत्रं

अस्य श्रीनारायण हृदय स्तोत्र मंत्रस्य भार्गव ऋषिः, अनुष्टुप् छंदः, श्रीलक्ष्मीनारायणो देवता, ॐ बीजं, नमः शक्तिः, नारायणायेति कीलकं, श्रीलक्ष्मीनारायण प्रीत्यर्थे जपे विनियोगः ||

करन्यासः –
नारायणः परं ज्योतिरिति अंगुष्ठाभ्यां नमः |
नारायणः परं ब्रह्मेति तर्जनीभ्यां नमः |
नारायणः परो देव इति मध्यमाभ्यां नमः |
नारायणः परं धामेति अनामिकाभ्यां नमः |
नारायणः परो धर्म इति कनिष्ठिकाभ्यां नमः |
विश्वं नारायण इति करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः –
नारायणः परं ज्योतिरिति हृदयाय नमः |
नारायणः परं ब्रह्मेति शिरसे स्वाहा |
नारायणः परो देव इति शिखायै वौषट् |
नारायणः परं धामेति कवचाय हुं |
नारायणः परो धर्म इति नेत्राभ्यां वौषट् |
विश्वं नारायण इति अस्त्राय फट् |

ॐ ऐंद्र्यादिदशदिशं ॐ नमः सुदर्शनाय सहस्राय हुं फट् बध्नामि नमश्चक्राय स्वाहा | इति प्रतिदिशं योज्यं |

अथ ध्यानं |
उद्यदादित्यसंकाशं पीतवासं चतुर्भुजं |
शंखचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिं || 1 ||

त्रैलोक्याधारचक्रं तदुपरि कमठं तत्र चानंतभोगी
तन्मध्ये भूमिपद्मांकुशशिखरदळं कर्णिकाभूतमेरुं |
तत्रस्थं शांतमूर्तिं मणिमयमकुटं कुंडलोद्भासितांगं
लक्ष्मीनारायणाख्यं सरसिजनयनं संततं चिंतयामि || 2 ||

ॐ | नारायणः परं ज्योतिरात्मा नारायणः परः |
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते || 1 ||

नारायणः परो देवो धाता नारायणः परः |
नारायणः परो धाता नारायण नमोऽस्तु ते || 2 ||

नारायणः परं धाम ध्यानं नारायणः परः |
नारायणः परो धर्मो नारायण नमोऽस्तु ते || 3 ||

नारायणः परो देवो विद्या नारायणः परः |
विश्वं नारायणः साक्षान्नारायण नमोऽस्तु ते || 4 ||

नारायणाद्विधिर्जातो जातो नारायणाद्भवः |
जातो नारायणादिंद्रो नारायण नमोऽस्तु ते || 5 ||

रविर्नारायणस्तेजः चंद्रो नारायणो महः |
वह्निर्नारायणः साक्षान्नारायण नमोऽस्तु ते || 6 ||

नारायण उपास्यः स्याद्गुरुर्नारायणः परः |
नारायणः परो बोधो नारायण नमोऽस्तु ते || 7 ||

नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखं |
हरिर्नारायणः शुद्धिर्नारायण नमोऽस्तु ते || 8 ||

निगमावेदितानंतकल्याणगुणवारिधे |
नारायण नमस्तेऽस्तु नरकार्णवतारक || 9 ||

जन्ममृत्युजराव्याधिपारतंत्र्यादिभिः सदा |
दोषैरस्पृष्टरूपाय नारायण नमोऽस्तु ते || 10 ||

वेदशास्त्रार्थविज्ञानसाध्यभक्त्येकगोचर |
नारायण नमस्तेऽस्तु मामुद्धर भवार्णवात् || 11 ||

नित्यानंद महोदार परात्पर जगत्पते |
नारायण नमस्तेऽस्तु मोक्षसाम्राज्यदायिने || 12 ||

आब्रह्मस्तंबपर्यंतमखिलात्ममहाश्रय |
सर्वभूतात्मभूतात्मन् नारायण नमोऽस्तु ते || 13||

पालिताशेषलोकाय पुण्यश्रवणकीर्तन |
नारायण नमस्तेऽस्तु प्रलयोदकशायिने || 14 ||

निरस्त सर्वदोषाय भक्त्यादि गुणदायिने |
नारायण नमस्तेऽस्तु त्वां विना न हि मे गतिः || 15 ||

धर्मार्थ काम मोक्षाख्य पुरुषार्थ प्रदायिने |
नारायण नमस्तेऽस्तु पुनस्तेऽस्तु नमो नमः || 16 ||

– प्रार्थना –
नारायण त्वमेवासि दहराख्ये हृदि स्थितः |
प्रेरिता प्रेर्यमाणानां त्वया प्रेरितमानसः || 17 ||

त्वदाज्ञां शिरसा कृत्वा भजामि जनपावनं | [धृत्वा]
नानोपासनमार्गाणां भवकृद्भावबोधकः || 18 ||

भावार्थकृद्भवातीतो भव सौख्यप्रदो मम |
त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितं || 19 ||

त्वदधिष्ठानमात्रेण सा वै सर्वार्थकारिणी |
त्वमेव तां पुरस्कृत्य मम कामान् समर्थय || 20 ||

न मे त्वदन्यस्त्रातास्ति त्वदन्यन्न हि दैवतं |
त्वदन्यं न हि जानामि पालकं पुण्यवर्धनं || 21 ||

यावत्सांसारिको भावो मनःस्थो भावनात्मकः |
तावत्सिद्धिर्भवेत् साध्या सर्वथा सर्वदा विभो || 22 ||

पापिनामहमेकाग्रो दयाळूनां त्वमग्रणीः |
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये || 23 ||

त्वयाहं नैव सृष्टश्चेन्न स्यात्तव दयाळुता |
आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः || 24 ||

पापसंघपरिश्रांतः पापात्मा पापरूपधृक् |
त्वदन्यः कोऽत्र पापेभ्यस्त्रातास्ति जगतीतले || 25 ||

त्वमेव माता च पिता त्वमेव
त्वमेव बंधुश्च सखा त्वमेव |
त्वमेव सेव्यश्च गुरुस्त्वमेव
त्वमेव सर्वं मम देवदेव || 26 ||

– फलश्रुतिः –
प्रार्थना दशकं चैव मूलाष्टकमतः परं |
यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् || 27 ||

नारायणस्य हृदयं सर्वाभीष्टफलप्रदं |
लक्ष्मीहृदयकं स्तोत्रं यदि चेत्तद्विनाकृतं || 28 ||

तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुध्यति सर्वदा |
एतत् संकलितं स्तोत्रं सर्वकामफलप्रदं || 29 ||

जपेत् संकलितं कृत्वा सर्वाभीष्टमवाप्नुयात् |
नारायणस्य हृदयमादौ जप्त्वा ततः परं || 30 ||

लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः |
पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीनुतिं जपेत् || 31 ||

तद्वद्धोमादिकं कुर्यादेतत् संकलितं शुभं |
एवं मध्ये द्विवारेण जपेत् संकलितं तु तत् || 32 ||

लक्ष्मीहृदयके स्तोत्रे सर्वमन्यत् प्रकाशितं |
सर्वान् कामानवाप्नोति आधिव्याधिभयं हरेत् || 33 ||

गोप्यमेतत् सदा कुर्यान्न सर्वत्र प्रकाशयेत् |
इति गुह्यतमं शास्त्रं प्राप्तं ब्रह्मादिभिः पुरा || 34 ||

लक्ष्मीहृदयप्रोक्तेन विधिना साधयेत् सुधीः |
तस्मात् सर्वप्रयत्नेन साधयेत् गोपयेत् सुधीः || 35 ||

यत्रैतत् पुस्तकं तिष्ठेल्लक्ष्मीनारायणात्मकं |
भूतपैशाचवेताळ भयं नैव तु सर्वदा || 36 ||

भृगुवारे तथा रात्रौ पूजयेत् पुस्तकद्वयं |
सर्वथा सर्वदा स्तुत्यं गोपयेत् साधयेत् सुधीः |
गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः || 37 ||

इत्यथर्वरहस्ये उत्तरभागे श्री नारायण हृदयं ||